# Rama Ashtakam

## રામાષ્ટકમ્ ૧૦

## Document Information

Text title : Rama Ashtakam

File name : rAmAShTakam10.itx

Category : raama, moropanta, aShTaka

Location : doc_raama

Author : Mayurakavi or Moropanta

Proofread by : Rajesh Thyagarajan

Description/comments : Stotras composed by Moropanta mayUrakavi

Latest update : December 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 23, 2023

*sanskritdocuments.org*

# રામાષ્ટકમ્ ૧૦

(પ્રથમમ્)

(સ્રગ્વિણીવૃત્તં)

યત્પ્રસાદાદ્વિપદ્બન્ધુરપ્યદ્ભુતં રાજ્યમિન્દ્રાદિભિર્દુર્લભં શાશ્વતં ।
પ્રાપ કૃત્વા સકૃત્પાદયોર્વંદનં ચિન્તયામઃ સદા તં સદાનન્દનં(૧) ॥ ૧॥

સજ્જનાનાં પ્રિયં દુર્જનાનામપિ સ્વાન્તસન્તોષદં સ્વાશ્રિતાનાં સમં ।
સર્વતાપપ્રણાશક્ષમં ચન્દનં ચિન્તયામઃ સુમિત્રાસખીનન્દનમ્ ॥ ૨॥

પુત્રતામેત્ય ચક્રે ખરાંશોર્વિધોર્યો જયં તસ્ય ન સ્વામિનોપ્યુશ્ચકૈઃ ।
જન્મદાત્સર્વલોકેષુ દિક્સ્યન્દનં ચિન્તયામઃ સદા તં રઘોનન્દનમ્ ॥ ૩॥

ક્ષ્માભૃતાં પાલકં ઘ્યક્ષમત્યદ્ભુતં ચાપબાણૈકપાણિં તપસ્વિપ્રિયં ।
એકપત્નીવ્રતં વિશ્વસઙ્ક્રન્દનં ચિન્તયામોઽજસૂનોઃ(૨) પ્રિયં નન્દનમ્ ॥ ૪॥

સાદરં યેદ્ધનુર્જ્યાનિનાદો(૩) ગુરુર્નાગભૂદેવદેવાઙ્ગનારાક્ષસીઃ ।
ગીતમધ્યાપયામાસ ચાક્રન્દનં ચિન્તયામોઽદ્ય સખ્યુર્હરેર્નન્દનમ્ ॥ ૫॥

શિશ્રિયે યત્પુરોપાટવી(૪) કેવલં નૈવ સર્વર્તુભિર્યોગિભિશ્ચોત્સુકૈઃ ।
સ્વર્ગિભિશ્ચાપિ હિત્વા પ્રિયં નદનં(૫) ચિન્તયામઃ સદા તં સદાનન્દનમ્ ॥ ૬॥

યેન્મુખં(૬) પ્રેક્ષતાં નાકિનામેવ નો વિસ્મૃતં પક્ષ્મભિર્ભૂગતાનામપિ ।
ચિત્રસન્મિત્રતામીયુષાં સ્પન્દનં ચિન્તયામઃ સદા તં સદાનન્દનમ્ ॥ ૭॥

અર્થિચેતશ્ચકોરામૃતાંશુર્મુખં સાધુ યસ્યાવદત્સર્વવર્ણેષ્વપિ ।
એકમેવેતિ મય્યઙ્ગમાનન્દનં ચિન્તયામઃ સદા તં સદાનન્દનમ્ ॥ ૮॥

ઇતિ શ્રીરામનન્દનમયૂરેશ્વરકૃતં રામાષ્ટકં સમ્પૂર્ણમ્ ।

ટિપ્પણિ

૧। સતામાનન્દનં શ્રીરામચન્દ્રમ્ ।

૨। અજસૂનોઃ દશરથસ્ય ।

૩। ગુરુર્યદ્ધુર્નિજ્યાનિનાદો નાગભૂદેવદેવાઙ્ગનાઃ ગીતં
રાક્ષસીશ્વાક્રન્દનમધ્યાપયામાસ તં ચિન્તયામઃ ઇતિ યોજનીયમ્ ।
૪। યત્પુરસ્યોપાટવી અયોધ્યાયા ઉદ્યાનમિત્યર્થઃ ।
૫। નન્દનવનમ્ ।
૬। “યન્મુખં પ્રેક્ષતાં ચિત્રસન્મિત્રતામીયુષાં સ્વર્ગિણામેવ નો વિસ્મૃતમ્ । પક્ષ્મભિર્ભૂગતાનામપિ સ્પન્દનં” ઇત્યન્યઃ કવિલિખિતઃ પાઠઃ ॥

Proofread by Rajesh Thyagarajan

*Rama Ashtakam*

pdf was typeset on December 23, 2023

Please send corrections to *sanskrit@cheerful.com*